२५पत्रे

भवान्वीप्रकाशो व्याख्यानगम
प्रकाशः

१२८५

३८५

श्लो: ५००

पत्रे २५

भवानं·टी·
१

श्रीमन्महागणपतये नमः ॥ इत्येव पाठ इति ॥ एवकारेण दिपदव्यवच्छेदः तस्य रीत्याद्याभावात् । एवं
वह्निधेतो प्रतियोग्यसमानाधिकरणत्वविशेषणे स्वप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्य
समानाधिकरणत्वविशेषणे स्वपदेन तेनादिनाप्रतियोगितावच्छेदकावच्छिन्नत्वविशेषणस्य परित्या
गः संभवतीत्यपि निरस्तं वृत्तित्वं यत्तु आदिनानिरूपकस्पर्शीय प्रतियोगिवैयधिकरण्यपरित्या
ग इति नवीनैरुक्तं तदपि चिंत्यं । एकत्र लक्षणे द्वयोः प्रवेशेन तस्य प्रतियोग्यसमानाधिकरणत्वां
तर्गततया अन्यतरत्र तत्परिहरस्यैव लाघवप्रयोजकत्वात् । न चादिनाभावे साध्यतावच्छेदकसं
बंधावच्छिन्नप्रतियोगिताकत्वपरिग्रहस्संभवतीति वाच्यं । समवायेन वह्निमद्भेदस्य वारणाया
न्योन्याभावघटितेपि साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकत्वनिवेशस्या
वश्यकत्वात् । साध्यतावच्छेदकसंबंधघटितप्रतियोग्यसामानाधिकरण्यनिवेशे भावे साध्य राम
तावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वेन साध्यतावच्छेदकसंबंधघटितप्रतियोग्यसा १
मानाधिकरण्येनैव वारणसंभवे नात्यंताभावत्वनिवेशप्रतेः अन्योन्याभावघटिते च
तद्विशेषणप्रवेशेनान्योन्याभावत्वमवश्यं निवेशनीयमित्युभयसाम्येनान्योन्याभावघ

॥ऽत्वेन लाघवमिति तत्त्वसत्त्व। तथापि तद्विशेषणवैयर्थ्यापत्तेः व्याप्तिरूपान्योन्याभावत्वनि
वेशेन लाघवानवकाशात्। अत्यन्ताभावघटितव्याप्तिज्ञानहेतुतावादिशंकते नैवेधितेऽथये
ति कृत्लाघवमिति तथा चान्योन्याभावघटितव्याप्तेरेवानुमितिहेतुत्वसाधकतयोपन्य
स्तं कृत्लीकृत्लाघवमसंगतमिति भावः। न चात्यन्ताभावघटितव्याप्तिज्ञानेऽन्योन्याभा
वघटितव्याप्तिज्ञाने च न प्रतियोग्यसामानाधिकरण्यं विषयतयाकारणतावच्छे
दकं तद्विषयकज्ञानादप्यनुमित्युत्पत्तेन व्यभिचारादित्याशयेन तु ऽस्य शंकते नन्वि
त्यादिना न चान्योन्याभावघटितव्याप्तिज्ञानहेतुतावादिने एवेयं शंकेति वाच्यं।
तन्मतेऽपि वह्न्यभावमानान्यरीत्या दोषस्य दुर्वारत्वेन तच्छंकाया मानयकतापत्तेः अत्र वृ
त्ति प्रतियोग्यसामानाधिकरण्याघटितव्याप्तिज्ञानकालेऽनुमितेः सर्वानुभवसि
द्धत्वात्तादृशव्याप्तिज्ञानहेतुत्वानुरोधेन तच्छून्यकालेऽनुमितेरपलपनीयत्वे
न तद्विशेषणस्योभयव्याप्त्यावेवानिवेशेन तत्र तायन लाघवचिंतेति समाधानाश

येनान्योन्याभावघटितव्याप्तिज्ञानहेतुतावादिन एवेयं शंका । नचैवमपि तज्ज्ञानहेतुत्व
साधकतयोपन्यस्तं मूलोक्तलाघवमसंगतमेवेति वाच्यं । तादात्म्यसंबंधावच्छिन्नप्रति
योगिताकत्वरूपान्योन्याभावत्वस्य संसर्गाभावविशेषत्वरूपात्यंताभावत्वापेक्ष
या लाघवस्यैव तत्साधकतया मूले उपन्याससंभवादिति । आख्यायामित्यपि पाठ इति
कुचित्पुस्तकेस्तीति शेषः तत्र तादृशपाठे असंभवतयेति लक्षणस्येत्यादिः असंभ
वितयेत्यर्थः । तद्विशेषणस्य साध्यतावच्छेदकसंबंधावच्छिन्नत्वविशेषणस्य क्वचि
त्यपपाठः नच तत्राद्यादिनेत्यादिपाठोस्तीति तत्राय पाठ इत्यस्यादिपदपरिग्राह्याभावादि
ति शेषः वन्ह्याद्यभावमादायासंभवतया नमादाय साध्यतावच्छेदकसंबंधघटितप्र
तियोग्यसामानाधिकरण्यस्यासंभवितया तादृशाभावे तस्यासंभवितयेति यावत् ।
। तद्विशेषणस्य । तद्विशेषणस्यैव साध्यतावच्छेदकसंबंधघटितप्रतियोग्यसामाना
धिकरण्यविशेषणस्यैवेति यावत् । एवकारेण साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्य व

छेदः दीधितौ हेतुसमानाधिकरणेति साध्यतावच्छेदकेसाध्येनेत्यादिः एवमग्रेपि व्याख्या
यां अभावावच्छिन्ना इति तत्कालावच्छिन्नाधिकरणतयाऽभावविशिष्टा इत्यर्थः इदंच स्व
रूपसदेवाभावविशेषणं तथाच प्रतियोगिसामानाधिकरण्यस्योपस्थितावनुपस्थि
तौ च नानुमित्यनुपपत्तिरितिभावः यावंत इति इदंच अभिचारग्रहे पि तादृशाप्रतिकिं
चिदभावप्रतियोगितानवच्छेदकत्वग्रहादनुमितेर्वारणाय तादृशाः हेतुसमाना
धिकरणाः तत्पुरुषीयानुमितेः तत्पुरुषीयतत्कालीनानुमितौ अत्रतत्तत्पुरुषाणां
तत्तत्कालानां च निवेशेनाननुगमः एवं कस्यापि पदभावप्रतियोगिसामानाधिकरण्य
ग्रहेन ज्ञातसत्ताविषयकतज्ज्ञानस्याप्रसिद्ध्या साध्यतावच्छेदके हेतुसमानाधिकर
णतादृशाभावप्रतियोगितावच्छेदकत्वज्ञानदशायामनुमित्यापत्तिस्यादिदूषणे स
त्येव स्फुटत्वात्तदुपेक्ष्य दूषणांतरमाह। दीधितौ तादृशाभावेति प्रतियोगितावच्छेदक
त्वत्वेनेति स्वावच्छिन्नप्रतियोगिताकत्व संबंधावच्छिन्नप्रकारत्वं तृतीयार्थः एवमग्रे
पिरूपेणेति। अनुमितिहेतुरितिशेषः। तादृशेति हेतुसमानाधिकरणे त्यर्थः व्याख्या

भवानं·टी यां ज्ञानासंभवादिति सामान्यघटितविशेषवत्तानिश्चयस्य सामान्याभावबुद्धिविरोधित्वा
२ दिति भावः ज्ञानासंभवादितितथा च प्रतियोगिसमानाधिकरणत्वेनाज्ञायमानत्व
विशेषणं निष्फलमिति भावः । येन केन चिद्रूपेणेति अत्रप्रेरतामात्रे तृतीयार्थः । त
3 स्य चानुपपत्ताभावग्रहेऽन्वयः न चैवं प्रमेयत्वादिना तादृशाभावग्रहेप्यनुमित्यापत्तिरि
तिवाच्यं । यत्किंचिद्रूपेण हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वघटितत्व
स्य निवेशात् सामान्यास्तु प्रतियोगितासंबंधेन तादृशप्रतियोगितावच्छेदकत्ववदभाव
ग्रहस्यैव हेतुत्वात् तत्र प्रतियोगितायाः संसर्गतयाऽभाने नोक्तापत्त्यभाव इत्याहुः । इद
पत्तीति अनुमितिप्रसंगे इत्यादिः तादृशपदार्थज्ञानेति व्याप्तिज्ञानाकारे स्यार्थः सामान्या राम
स्तु धूमसमानाधिकरणेतितादृशरूपेहेतुसमानाधिकरणाभावप्रतियोगितावच्छे २
दकत्वघटितत्वनिवेशेपि विशेषणानापेक्ष्याहुः न चेतीति । तथा च प्रतियोगिसमानाधि
करणत्वेनाज्ञायमानाहेतुसमानाधिकरणत्वेनज्ञायमानायावन्तोभावास्तत्प्रति
योगितावच्छेदकत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वघटितरूपे

णाभावस्य ग्रहो हेतुरिति भावः तत्प्रतियोगिनेति हेतुसमानाधिकरणत्वेन ज्ञायमाननिखिला
भावप्रतियोगिनेत्यर्थः। दीधितौ तथाग्रहे इति वह्नित्वानवच्छिन्नप्रतियोगिताकहेतुसमानाधिक
रणनिखिलाभावप्रतियोगितावच्छेदकत्वाभावग्रहे इत्यर्थः। संभवाद् इति। तथा च तद्दशायां
मनुमित्यापत्तिरिति भावः। आख्यायां भ्रमे धूमसामानाधिकरण्यभ्रमे उक्तरूपेण वह्नित्वा
नवच्छिन्नप्रतियोगिताकत्वेन तादृशाभावे इति धूमसमानाधिकरणत्वेन ज्ञायमानवह्न्य
भावे इत्यर्थः। तथा च तद्दशायां वह्नित्वानवच्छिन्नप्रतियोगिताकधूमसमानाधिकरणनिखिला
भावप्रतियोगितानवच्छेदकत्वग्रहासंभवादिति भावः। केचित्तु एकधर्मावच्छिन्नप्रतियो
गिताकाभावेऽन्यधर्मावच्छिन्नप्रतियोगिताकत्वभ्रमे मानाभावात् इह दीधितौ धूमा
धिकरणं तरेमीत्याहुः तद्वृत्त्यभावस्यापि तद्वृत्तिरासभाद्यभावस्यापि। एतदधिकरणे
ति एतच्छब्देन पत्र धूमाधिकरणे रासभसत्त्वस्य परिग्रहः तेन रासभत्वादौ चेत्यस्योपप
त्तिः तस्य परिग्रहाभाव इति धूमसमानाधिकरणत्वेन ज्ञायमानाधिकरणं तद्वृत्त्यभा
वस्य परिग्रहसंभवादित्यर्थः। तथा च तादृशभ्रमोत्पादेऽपीत्यनेनाभिमतस्य धूमाधिकरणे

५

तद्रूप्याभावप्रतियोगितानवच्छेदकत्वत्वेन प्रतियोगिसमानाधिकरणत्वेनाज्ञायमानहेतुसमा
नाधिकरणत्वेन ज्ञायमानायां वृत्तोऽभावस्तत्प्रतियोगितानवच्छेदकत्वप्रमीत्यादस्यासंभ
वइति भावः। इदं अनुपस्थित्यंत। एतेनेत्यादिग्रन्थव्याख्यानानुपपत्तेराह। इत्थं चेति। अधिक
रणेत्ति धूमाधिकरणे इत्यर्थः इत्युक्ते इति तावतापि ग्रन्थव्याख्यानानुपपत्तिवारणसंभवादिति
भावः इत्थं अधिकरणं तस्येत्यादिरूपेण। धूमाधिकरणेति तत्तदेतदधिकरणनिष्ठाभा
वानामेव धूमसमानाधिकरणत्वेन ज्ञानादिति भावः। एतद्रूप्यभावेति एतन्महानसवृत्त्य
भावेत्यर्थः प्रतियोगितानवच्छेदकत्वप्रमोत्पादेपीति तादृशप्रतियोगितानवच्छेदकत्वत्वेन नि
रुक्ताभावप्रतियोगितानवच्छेदकत्वप्रमोत्पादेपीत्यर्थः अत्र लाघवज्ञानादिकं विनाभि
चारिलिंगकानुमितेर्व्याप्तिभ्रमजन्यत्वनियमेन तादृशाभावाद्यनुमितेरसंभवसूचनाय प्रमा
त्वमुक्तं। इष्टापत्तिवारणाय दृष्टांतमाह धीधितेरासभाहेरि चेति येन ज्ञानेन तत्परिग्रहः राम ४
वस्तुतस्तु सामान्यलक्षणयेत्यादिग्रन्थमात्र दूषणेन प्रत्यक्षसाध्यात्मकपरामर्शपरिग्र
हासंभवात्तादृशस्मरणमेवीति। आदिनाशाब्दपरिग्रहः इत्येवस्मरणसाहीति। आदिनासं

म एतन्महानसांशे लौकिकसंनिकर्षाभावेन तत्तेन तद्विषयकपरामर्शस्य लौकिकप्रत्यक्षत्वा
संभवादाह। व्याख्यायां। अनुमित्यापत्तिरिति। अयं दोषस्तु वन्ह्यभावे धूमसामाना
धिकरण्यभ्रमाभावदशायां बोध्यः एतेन धूमाधिकरणं तदानुपस्थितावित्यस्य धू
माधिकरणं तदस्याभावनिष्ठवृत्तित्वनिरूपकतयाऽनुपस्थितावित्यर्थकरणेन तद
धिकरणे धूमाधिकरणे तन्महानसे तद्वन्हेर्निश्चयेन पक्षताऽसंभवादपक्षता
सत्त्व इति। निश्चयाभावदशायामित्याशयः प्रत्यक्षात्मकपरामर्शं विहाय स्मरणा
त्मकपरामर्शपर्यन्तानुसरणबीजमाह। सामान्यलक्षणया वेति। प्रत्यक्षे धूमव
त्त्वसामान्यलक्षणया वा धूमाधिकरणं तदोपस्थितिसंभवादिति भावः। अधि
करणं तदेति धूमेत्यादिः। तत्र धूमाधिकरणं तदानुपस्थितावितीत्यादीति आदि
ना प्रमेयत्वादिनाधिकरणं तदीयस्थितेः संभवेन तद्विरुद्धमित्यस्य परिग्रहः अनव
काशमिति स्मरणात्मकपरामर्शादधिकरणं तदेऽनुमित्यापादनसंभवादितिभा

भवानं·दी·
५
5

वः। केचित्तु दीधितौ धूमाधिकरणान्तरानुपस्थितादिति रासभधूमान्यधूमाधिकरणानुपस्थि
तादित्यर्थः। तादृशोक्ति रासभत्वं धूमवन्निष्ठरासभत्वानवच्छिन्नाभावप्रतियोगितान
वच्छेदकं वह्नित्वं धूमवन्निष्ठवह्नित्वानवच्छिन्नाभावप्रतियोगितानवच्छेदकमित्येवं प्रमीत्या
दृ पीत्यर्थः वह्नित्वे रासभत्वानवच्छिन्नेत्यादिविशुद्धासाधारण्येति। रासभधूमान्यधूमाधिकर
णोपस्थितिदशायां रासभत्वे निरुक्तानवच्छेदकत्वं दुर्ग्रहमतोऽनुपस्थितादित्यन्तमित्याहुः
। पर्वतादृशाविति अधिकरणान्तर इति शेषः। एतन्महानसएवेति पाठः स च संदेहपक्षता
भिप्रायकः तदधिकरणान्तरे पक्षताया अभावादेवानुमित्यापत्तेरसंभवादिति भा राम
वः। क्वचित्तु महानसइवेत्येव पाठः संदेहदशायां तु पर्वतादौ वह्नेः संदेहदशायां तु। वह्न्यभा ५
वस्यापीति तुल्यवित्तिवेद्यतयेति शेषः। उपस्थितत्वात् संदिग्धत्वात्। हेतुसमानाधिकर
णत्वेन निश्चीयमानत्वस्याभावविशेषणत्वे तु गौरवादिकं दूषणं। तत्प्रतियोगितान
वच्छेदकत्वाग्रहादिति हेतुसमानाधिकरणत्वेन ज्ञायमानवह्न्यभावघटितनिखिलाभा

वप्रतियोगितानवच्छेदकत्वस्य तत्साधिकरणघटितविरुद्धप्रतियोगितानवच्छेदकत्वेनापि ग्र
हासंभवादित्यर्थः। तदुक्तं वह्न्यभावस्यापि हेतुसमानाधिकरणत्वेन ज्ञाप्यमाननिखिलतां
तर्गतस्य धूमाधिकरणे तन्महानसवृत्तित्वेन परिग्रहासंभवादिति भावः। दीधितौ र
र्वाभिमिति। वह्न्यभावे धूमसामानाधिकरण्यभ्रमदशायामित्ति विशेषः। आरम्भायां धूम
वतीति तथा चेत्यादिः। इतरेषां तु घटाद्यभावानां तु उक्तरूपेण। उक्तप्रतियोगिताकाद्
यादिरूपेण। व्यभिचारज्ञानदशायामपि। वह्नित्वं धूमसमानाधिकरणाभावप्र
तियोगितानवच्छेदकमिति भ्रमकालेपि। तेन रूपेण उक्तप्रतियोगिकाद्यादिरूपेण
दुर्ग्रहमिति। महानसीयवह्नित्वे धूमसमानाधिकरणोक्ताभावप्रतियोगितावच्छे
दकत्वग्रहसंभवादिति भावः। तथैव दोषः उक्तरीत्या वह्नित्वे तेन रूपेण प्रतियोगिता
नवच्छेदकत्वस्य दुर्ग्रहत्वरूपो दोषः। उक्तत्वाभावज्ञानदशायामिति सामान्यतो विह
प उक्तत्वाभावभ्रमदशायामित्युक्तौ किं बीजमत आह वक्ष्यतीति वह्नित्वावच्छेदेनेत्यर्थः।

भवानं॰ दी॰
६
6

युक्तत्वज्ञान। शाखायामपि युक्तत्वसंदेहदशायामपि। वह्नित्वावच्छिन्नाभावस्य युक्तप्रति
योगिकत्वसंदेहे तत्साध्यप्रकारेतिशेषः। तत्सत्वे च तादृशसंशयसामग्रीसत्वे च। निर्ण
यासंभवादिति संशयसामग्र्याः प्रतिबंधकत्वादिति भावः। सामग्रीति संशयसामग्री
त्यर्थः। भ्रमपर्यंतेति तथा च भ्रमपर्यंतं निश्चयपरमिति भावः। दीधितौ वह्नौ तत्प्रतियोगि
काद्येति। वह्नीत्वानवच्छिन्नप्रतियोगिकाद्येत्यर्थः। धूमसमानाधिकरणाभावादिति
व्याप्तिज्ञानकारणत्वार्थमिदं व्याख्यायां विशिष्टाभावेति। अत्र प्रमेयत्वादिना तादृशा
वच्छेदकत्वाभावज्ञानमादाय यानुमितिस्सा यत्र तत्तु पूर्वोपदर्शितरीत्यैव वारणीयेति ध्येयं। राम
नन्वेवमित्यादि पूर्वपक्षे समाधत्ते दीधितौ मैवमित्यादि व्याख्यायां उपदर्शितेति प्रति ६
योग्यसामानाधिकरण्यघटितेत्यर्थः। द्विविधाभावानामिति अत्र प्रतियोग्यसामानाधि
करण्यघटिताघटिताव्यभिचारयोरनवच्छेदकमिमत्रात्यंतान्योन्याभावद्वैविध्याभे
देन चातुर्विध्यमिति। न बहुवचनानुपपत्तिरिति ध्येयं। ज्ञानमेवेति। एवकारेण। विष

पयावच्छेदः तदिति हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्ववद्धीत्यर्थः
प्रतिबध्यतानवच्छेदकत्वादिति हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेद
कत्ववद्धीत्यर्थः प्रतिबध्यतानवच्छेदकत्वादितिहेतुसमानाधिकरणाभावप्रति
योगितानवच्छेदकत्ववद्धीत्यर्थः प्रतिबध्यतानवच्छेदकत्वादितिहेतुसमानाधि
करणाभावप्रतियोगितानवच्छेदकत्ववद्धीत्यर्थः प्रतिबध्यतानवच्छेदकत्वादिति
हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वग्रहत्वस्यैव प्रतिबध्यताव
च्छेदकत्वादितिभावः। अतिप्रसंग इति तादृशज्ञानस्य वह्नित्वविशेष्यकघटप्रका
रकग्रहत्वावच्छिन्नं प्रतिविरोधित्वादितिभावः घटकीभूतेति घटकत्वं च भेदाभेद
साधारणं। तेन प्रतियोग्यसामानाधिकरण्यघटितानवच्छेदकत्वग्रहसंग्रहः।
विषयितावच्छिन्नेति। तादृशविषयिताशालिग्रहत्वपर्याप्तावच्छेदकताकेत्यर्थः तेन
हेतुसमानाधिकरणवह्न्यभावेतराभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नविषयक

ग्रहत्वावच्छिन्नप्रतिबध्यतायाः अपि अधिकं त्विन्मायेन ताद्दृशविषयितावच्छिन्नत्वपात
न्निरूपितप्रतिबंधकतामादाय न ताद्दृशावच्छेदकत्वग्रहेऽतिप्रसंगः न वा ताद्दृशप्रा
वन्हित्वविषयितायाघटाभाववद्वन्हित्वामिति ज्ञानप्रतिबध्यतावच्छेदककोटिप्रविष्टत्वे
न ताद्दृशज्ञानादतिप्रसंगस्तादवस्थ्यम्। विरोधित्वस्येति विरोधितावच्छेदकतापर्या
प्ताधिकरणधर्मवत्वस्येत्यर्थः। तेन विरोधित्वस्य विरोधितावच्छेदकधर्मवत्वरूपतया ता
द्दृशज्ञानत्वमादाय नातिप्रसंगः अत्र स्ववृत्तिताद्दृशविषयिताघटितोक्तधर्मवत्वसंबं
धेन ताद्दृशग्रहवत्वमेवाऽननुगमकं तेन प्रतिबध्यताविरोधित्वयोरवच्छेदकभेदेन ना
नात्वेपि नाननुगमानुपपत्तिः संबंधाननुगमस्यादोषत्वादिति ध्येयं। वन्हित्वविशेष्य
कत्वं वन्हित्वविशेष्यकग्रहत्वं। घटितत्वस्य बुद्धिविशेषणत्वभ्रमनिरासायमाह। सामानाध
घटितेति। नीलो घटो नास्तीति नीलघटवद्धित्यर्थः नीलं नास्तीति। यत्तत्र नीलं नास्ती
ति ज्ञानस्य नीलवद्वृत्त्याकारकज्ञान एव स्वतो विरोधित्वं नीलघटवद्वृत्ति यत्र तत्प्रतिबध्य

तावच्छेदकाभावात् अत एव भूतलं नीलघटवदिति ज्ञानेऽपि नीलत्ववन्न वेत्यादिः संशयोऽनुभूय
ते कदाचिद्विरोधस्तु व्याप्यवृत्तिकत्वेन ग्रहादेवेति ध्रुवणोद्भावनं तत्र सम्यक् विरोधित्वयोन्न
स्य नीलत्वं नास्तीति ज्ञानस्य नीलत्वेन घटविषयकत्वं न तु रूपविषयकत्वमिति तत्प्रति
बध्यतावच्छेदकस्य नीलत्वावच्छिन्नप्रकारताशालिज्ञानत्वस्याधिकत्वेति न्यायेन नी
लघटवदिति ज्ञानेऽपि सत्वात् अन्यथा घटे नास्तीति ज्ञानप्रतिबध्यतावच्छेदकस्या
पि तत्साधारण्यानुपपत्तेः अत एवेत्यादिकमपि मदंता दृशानुभवस्यैवासिद्धेः धीधि
तौ तत् तादृशबोधानुदयस्वरूपं कस्य हेतोरिति अत्र पंचम्यर्थे षष्ठी षष्ठी हेतुप्रयोग
इत्यनुशासनात् । तथा चात्र स्यहेतोर्वसतीत्यत्राह्वेतोरितिवत् कस्माद्धेतो
रिति लब्धं कीदृशहेतुप्रयुक्तमित्यर्थः कीदृशविरोधित्वप्रयुक्तमितियावत् विरोधि
तांतरकल्पने गौरवादिति भावः आख्यायां प्राथयितुमिति । अन्यथा तत्संबंधा
वच्छिन्नतद्वच्छेदकताकाभावबुद्धेः सत्त्वां संबंधांतरेण यत्राधिशिष्ठं तद्वत्ताबुद्धेः सत्ता

४

तानापत्तेरिति भावः रोधितोविरोधित्वादिति अध्याहृतपंचम्यंतहेतोरिस्य यत्नेनान्वयियत्व
त्रविरोधित्वादिति पंचमी तिस्याषष्ठी हेत्वप्रयोगे इत्यनेन षष्ठ्या एव साधुत्वादिति केचि
दुक्तं तन्न। निमित्तपर्यायप्रयोगे सर्वासां विभक्तीनां प्रायदर्शनमिति वार्त्तिकेन पंचम्या
अपि साधुत्वात्। वस्तुतो विरोधित्वादिति तदिति प्राक्तनान्वितं न त्वध्याहृतहेतोरिस्य
नेनेति नोक्तदोषः। तादृशाविरोधित्वप्रयुक्तं तत्स्वरूपं घटत्वविशिष्टलक्षतां घटत्वावैशिष्ट
प्रतियोगिमज्ज्ञानं अयमाशयः घटत्वावच्छिन्नप्रकारताशालिबुद्धित्वावच्छिन्नं प्रति घटत्वा
वच्छिन्नाभाववज्ज्ञानत्वस्य विरोधितायाः मतया तत्प्रतिबध्यतावच्छेदकस्याधिकं
त्विति व्याप्येन नीलघटवत्ताबुद्धिसाधारण्येन न विरोधितां तरकत्व नैगौरवमिति। न
च्चाहार्यप्रसत्ये व्यभिचारवारणाय छायाज्ञे अकत्वेन नीलघटत्वावच्छिन्नप्रकारता
शालिप्रत्यक्षं जायतामिति सीछासत्वे घटत्वावच्छिन्नाभावनिश्चयसत्वे नीलभा
सकसामग्र्यसत्वेऽनुद्घटत्व पीतघटत्वावच्छिन्नप्रकारताशालिप्रत्यक्षस्य वारणा

राम
८

यन्नीलघटत्वाद्यवच्छिन्नप्रकारताशालिप्रत्यक्षत्वावच्छिन्नं प्रति तादृशतादृशेच्छाविरहविशि
ष्टघटत्वावच्छिन्नाभावनिश्चयस्य पृथक् प्रतिबंधकत्वस्यावश्यकतया कथं तन्न प्र
तिबंधकतयैवोपपत्तिरिति चेन्मैवं आहार्यप्रत्यक्षे व्यभिचारवारणायेच्छायाउत्तेजक
त्वे दोषविशेषत्वेनौ लौकिकसंनिकर्षजन्यप्रत्यक्षे व्यभिचारवारणाय तुल्ययुक्त्या तयोरप्यु
त्तेजकत्वे दोषादिकाले आहार्यादिप्रत्यक्षापत्तिवारणाय तत्रेच्छादेः कारणत्वावश्य
कत्वेऽनाहार्यत्वादिकं प्रतिबध्यतावच्छेदककोटौ निवेश्य घटत्वावच्छिन्नप्रकारताशा
लिप्रत्यक्षत्वस्यैव प्रतिबध्यतावच्छेदकत्वमुपेत्यैकप्रतिबंधकत्वस्यैवो
चितत्वात् अत एव पूर्वव्याख्यायामनिच्छित्वादिनाशकापि संगच्छते अन्यथेच्छाया
उत्तेजकत्वे प्रतियोग्यसामानाधिकरण्यघटिततादृशावच्छेदकत्वग्रहत्वस्य हे
तुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वबुद्धिप्रतिबध्यतावच्छेदकत्वस्या
वश्यकतया तत्संगत्यापत्तेरिति दिक्। ननु प्रतियोग्यसामानाधिकरण्यघटित

भवानं·टी·
९८ तद्घटितज्ञानयोस्सपदर्शितविरोधिताघटितगुरुरूपेणानुगमो निष्प्रयोजनः प्रतियो
९ ग्यसमानाधिकरणत्वप्रकारताभिन्नासती हेतुमद्वृत्तित्वप्रकारताभिन्नाऽभाववत्वप्रका
रताभिन्नाचया प्रकारतातन्निरूपिताया अभावप्रकारतातन्निरूपितप्रतियोगित्वप्रका
रता निरूपितावच्छेदकत्वप्रकारतानिरूपिताभावप्रकारतानिरूपितसाध्यतावच्छेद
कविषयताशालित्वेन विरोधित्वाघटितलघुरूपेणानुगमसंभवादत आह । अत
एवेति । तथा चैतद्रूपेणानुगमे तादृशावच्छेदकतत्वान्योन्यात्यंताभावद्वययोरेक
तरनिवेशेऽन्यतरशालित्वग्रहासंग्रहापत्त्या विरोधिताघटितोपदर्शितगुरुरूपेण राम
अनुगमस्यावश्यकत्वमिति भावः व्याख्यायां अभावप्रकारतेत्ति अत्राभावेत्ति स्वरूप ९८
कथनं न तु तन्निवेशोऽपि तु तत्प्रकारतायाः तादृशप्रतियोगिताकत्वसंबंधेन किं
चित्प्रकारतानिरूपितत्वाभावेनैव वारणमिति ध्येयं । तादृशावच्छेदकत्वं चेति । ता
दृशावच्छेदकत्वत्वेन तादृशावच्छेदकत्वस्य भानादित्याशयः । नातिप्रसंग इति । नचैव

मपि तादृशावच्छेदकत्वाभावव्याप्यहेत्वभावादिग्रहस्य तादृशावच्छेदकत्वत्वेन तादृ
शावच्छेदकत्वग्रहत्वघटकीभूतविषयितानिरूपकतावच्छेदकहेतुतावच्छेद
कावच्छिन्नाभावावगाहित्वनियमात्तत्रातिप्रसंगो दुर्वार इति वाच्यं तादृशग्रहत्वपर्या
प्तावच्छेदकताकप्रतिबंधकत्वविवक्षणेन तत्र व्याप्तिविषयतायाअधिकायाः प्र
तिबंधकतावच्छेदककोटौ प्रवेशेनादोषात् । अतएव तादृशावच्छेदकत्वव्यापक
हेत्वभावग्रहेपि नातिप्रसंगः तत्प्रतिबंधकतायामधिकायाव्यापकत्वविष
यतायाः प्रवेशात् । यद्भावप्रकारकत्वमिति । अत्राप्यभावेतिस्वरूपकथनं
न तु विवक्षितं प्रयोजनाभावात् अतएवानुपदमेव तत्र हीत्यादिना व्याप्यप्र
कारकत्वस्य प्रतिबंधकतावच्छेदकत्वाभिधानमपि संगच्छते । तद्भावव्या
प्ये तितद्भावव्याप्यवत्ताबोधेत्यर्थः । प्रकारकत्वस्य व्याप्यप्रकारकत्वस्य । न च त
भावत्वविवक्षणेनैव तद्भावव्याप्यवत्ताबोधनिरासस्संभवेन प्रतियोगितायास

भयानं.थी.
१०
10
वंधेनेत्यादिविवक्षणीयफलमितिवाच्यं।अभावत्वविवक्षायोपितदभावव्याप्यध
र्माद्यभावादिग्रहवारणाय तद्विवक्षणस्यावश्यकत्वात् अतिप्रसंगादिति त
त्र वन्हित्वनिष्ठविशेष्यतानिरूपिताभावप्रकारकत्वस्वप्रतियोगितासंवंधेनै
व व्यापकत्वावछिन्नप्रकारकत्वावछिन्नत्वादिति भावः।नवीनास्तु ताहशावछे
दकत्वग्रहविरोधित्वेनेत्यत्र ताहशावछेदकत्वग्रहो विरोधी यस्य तत्वेनेति
वस्तुस्यात्ताहशावछेदकत्वग्रहप्रतिवध्यत्वस्यलाभः ताहशावछेदकत्वग्रहस्य
विरोधित्वं तेनेति नैरतुस्यात्ताहशावछेदकत्वत्वेह प्रतिवंधकत्वस्यापिलाभः
तदभावव्याप्यवत्ताज्ञानादीनां निरुक्तप्रतिवध्यत्वाभावान्निरासः संशयस्य राम १०
निरुक्तप्रतिवध्यत्वेपिप्रतिवंधकत्वाभावान्निरास इति वदंति तदपरे न क्षमं
ते।नचात तद्रूपसंम्यानाधिकरण्याभावप्रतियोगितानवछेदकविषयक
लौकिकग्रहाव्याप्तेः।नचलौकिकताहशावछेदकत्वग्रहप्रतिवध्यत्वनिवेश।

न्तरेषु इति वाच्यं। तादृशावच्छेदकत्वग्रहप्रतिबध्यत्वस्य तादृशावच्छेदकत्वग्रहनि
ष्ठप्रतिबंधकतानिरूपितप्रतिबध्यत्वरूपत्वे तद्व्याप्यवत्ताज्ञानादेरपि ता
दृशावच्छेदकत्वतादृशव्याप्याभाववत्तासमूहालंबनग्रहप्रतिबध्यत्वेन वारयितुम
संभवात्। न च लौकिकतादृशावच्छेदकत्वग्रहत्वव्यापकप्रतिबंधकतानि
रूपितप्रतिबध्यत्वविवक्षणान्न दोषलेशसंभव इति वाच्यं। उपदर्शितलौकिक
ग्रहस्य भिन्नेंद्रियजन्यज्ञानाप्रतिबध्यतया निरूक्तप्रतिबध्यत्वानाक्रांतत्वेन
तत्राव्याप्तितादवस्थ्यात् इति अप्रतिबध्यतादिशि अवच्छेदकत्वप्रकारतायां
स्वरूपसंबंधावच्छिन्नत्वं निवेश्यं। तेन तादात्म्येनावच्छेदकत्वप्रकारकग्रह
मादाय तत्तादृशावच्छेदकत्वान्योन्याभावग्रहेणातिप्रसंगः इति ध्येयं। अप्रमाप्र
सिद्धेति। अन्यथाहार्यभ्रमस्याप्यप्रसिद्धेः अप्रसिद्धेः तद्विशेषितत्वेन। तन्निष्ठप्रति
बध्यतानिरूपितप्रतिबंधकत्वेन। स्वेच्छाया उत्तेजकत्वमते आहार्यभ्रमस्या

भवानं·टी ११ पि प्रतिबध्यतावच्छेदकक्रांतत्वस्यानेयमनुपपत्तिरिति वाच्यं । एवं पूर्वोपदर्शितरीत्याहवांछा
याहेतुत्वावश्यकत्वेनानाहार्यत्वस्य प्रतिबध्यतावच्छेदककोटौ निवेशेनानाहार्यभ्रमस्य
अनुमितिबध्यतावच्छेदकाक्रांतत्वमित्याशयात् । ज्ञानद्वयेति प्रतियोग्यसामानाधिकर
ण्यघटिततद्घटितज्ञानद्वयेत्यर्थः । इत्यपि ज्ञानमिति अपिना तादृशवह्नित्वं तादृश
प्रतियोगितानवच्छेदकमिति ज्ञानपरिग्रहः । अनुमित्यापत्तिरिति । यथा तद्विशि~~ष्ट~~
धयकस्य वह्नित्वत्वावच्छिन्नविशेष्यकतादृशप्रतियोगितावच्छेदकत्वप्रकारकग्रह
स्य विरोधित्वात्तादृशवह्नित्वं तादृशप्रतियोगितानवच्छेदकमिति ग्रहात्तादृशानु
मितिस्तथा निरुक्तग्रहस्य विरोधित्वाद्वह्नित्वं तादृशप्रतियोगितानवच्छेदकमि राम ११
ति ग्रहादपि तादृशानुमित्यापत्तिरिति भावः । तादृशसाध्यतावच्छेदकेति तादृशसा
ध्यतावच्छेदकतापर्याप्त्यधिकरणे इत्यर्थः । यथाश्रुते विशिष्टस्यानतिरिक्ततया पू
र्वोक्तापत्तेरवारणादेवमपि यत्र साध्यतावच्छेदकविशिष्टे तादृशप्रतियोगिता

वच्छेदकत्वग्रहसमानप्रसिद्धं तत्र तद्विरोधित्वेनुमानादृशज्ञानद्वयानुगमासंभवइतिवाच्यं। त
ज्ञानीयत्वाप्रसिद्धावपि तेनरत्वघटितं तद्व्यक्तित्वं वा कार्यतावच्छेदकमुपेयमतादृशज्ञानद्वयस्य
हेतुत्वद्वयकल्पनागौरवादिति ग्रहस्येति। आदिना वह्नित्वं प्रतियोगितानवच्छेदकमितिग्र
हपरिग्रहः। एवमग्रेपि संबंधज्ञानादेव। साध्यसामानाधिकरण्यज्ञानादेव। निरास
इति। तस्य समानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहविरोधित्वादिति भावः
असंग्रह इति तस्य समानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहविरोधित्वादिति
भावः। साधारण्यादिति समूहालंबने प्रकारभेदेन विशेष्यताभेदात् धूमसमानाधिकरण
भावप्रतियोगितानवच्छेदकत्वप्रकारतानिरूपितविशेष्यत्वेन निरुक्तावच्छेदकत्वसंभ
वादिति भावः साध्यसमानाधिकरणहेतुमत्त्वावगाहित्वस्य स्वातंत्र्येण निवेशेनापि
वह्नित्वं धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकमितिज्ञानवारणं संभव
तीत्याशयेनाह समूहेत्यादि समूहालंबनज्ञानादपीति नातिप्रसंग इति न चातिप्रसंगाभा

देप्यनुगतप्रतियोग्यसामानाधिकरण्यस्य दुर्वचतया न तद्घटितरूपेणानुगमसंभव इति वा
च्यं। सिद्धांतलक्षणे प्रदर्शितरीत्यानुगतप्रतियोग्यसामानाधिकरण्यस्य सुवचत्वात्।
अत्र नव्याः प्रतियोग्यसामानाधिकरण्यघटिततद्घटितज्ञानद्वयस्य पृथगेव हेतुता
। अन्यलिंगकानुमितौ व्यभिचारवारणाय कारणतावैशिष्ट्यस्यावश्यं निवेशनीयतया
परस्परव्यभिचारानवकाशात्। न चोक्तानुगतरूपेणैकहेतुतासंभवे हेतुताद्वयक
ल्पनमनुचितमिति वाच्यं। अप्रामाण्यज्ञानाभावस्य वैशिष्ट्यनिवेशानुरोधेन हेतु
ताद्वयकल्पनाया आवश्यकत्वात्। न चाप्रामाण्यग्रहास्कंदिततज्ज्ञानस्य तादृशावच्छेद
कत्वग्रहाप्रतिबंधकतयैव वारणे प्रामाण्यज्ञानाभाववैशिष्ट्यनिवेश एव नास्तीति राम
वाच्यं। अप्रामाण्यज्ञानविशिष्टस्यापि ज्ञानस्य तदभाववत्तायामप्रामाण्यज्ञानाभा
ववि शिष्टतया तादृशावच्छेदकत्वग्रहप्रतिबंधकत्वात्। न च तादृशावच्छेदकत्वग्रहप्र
तिबंधकतावच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टत्वेन हेतुत्वोपगमादेव नाप्रामा

न्यज्ञानविशिष्टज्ञानादनुमित्यापत्तिरिति वाच्यं। अवच्छेदकताया व्यासज्यवृत्तित्वाभावेन प्रति
बंधकतावच्छेदकघटकज्ञानत्वादेरपि तत्त्वपर्याप्त्यधिकरणत्वात् अप्रामाण्यज्ञानकाले
ऽनुमित्यापत्तेर्दुर्वारत्वादिति वदंति तन्न सम्यक् अवच्छेदकताया व्यासज्यवृत्तित्वस्वप
र्यवसन्नाप्यतत्त्वादिति दिक्। एवं च एवमित्यादिनोत्तराकृतं तत्र स्वपूर्वपक्षं मैवमित्या
दिना समाधाय अथेत्यादिना लाघवमिमं तेन प्राक् कृतं प्रकृत पूर्वपक्षं दृढीकर्तुमाह
टी। घटितेति अन्योन्याभावस्येत्यादि तु तरामिति। स्वरूपतो विषयतया संबंधः विशेषणेति
प्रतियोग्युत्साभावाधिकरणपविशेषणेऽर्थः तदेव विवृणोति व्याख्यायामन्योन्याभाव
स्येति। व्यापितत्त्वस्थलेऽपीति। अपि ना कारणीभूतज्ञानविषयतावच्छेदकसमुच्चयः तद्वि
शेषणमिति तथा च नान्योन्याभावघटितत्वस्थले लाघवमिति भावः तार्किकचक्रवर्ति
नस्तु कारणीभूतज्ञानविषयतावच्छेदकस्यैव व्याप्तिस्वरूपतया कारणीभूतज्ञान एव वि
षयतया सर्वविशेषणं स्वरूपेत्व्यावर्तकमेव एवं चान्योन्याभावाव्याप्यवृत्तित्वज्ञानस्य

त्वेकारणीभूतज्ञानएवविषयतयासर्वविशेषणांसवृत्त्येत्वअवच्छेदकमेवएवंचात्यन्ताभावा
व्याप्यवृत्तित्वज्ञानसत्वेकारणीभूतज्ञानंअत्यन्ताभावघटितलक्षणेविविषयत
यातद्विशेषणनिवेशफलं व्याभावस्यवृत्त्यनियामकाव्याप्यवृत्तित्वयोर्विशेषाभावेनसुत
रामित्येतन्नस्वारस्यमावहतीत्युक्तरीत्यात्यन्ताभावस्यैत्यादिग्रंथोनसाधीयः किंतुप्रका
रांतरेणतथाहिननुभेदघटितलक्षणेपिप्रतियोगिसामानाधिकरण्यविशेषणं ना
नश्यकंअव्याप्यवृत्तावव्याप्यवृत्तित्वभ्रमाभावेनाथैत्यादिनाघ्नवेक्तंतत्प्रयोजनासं
भवात्। नचाव्याप्यवृत्तित्वभ्रमेवाधकाभावइतिवाच्यं। तस्यसंयोगवति संयोगवद्भे
दनिश्चयपर्यवसन्नत्वेनतत्रप्रतिबंधकस्यसंयोगावच्छिन्नानिश्चयस्यसत्वेनतत्संभवा 
त्। नचफलानुरोधेनावच्छेदकभेदमंतर्भाव्यप्रतिबंधकतावच्छेदनेनावच्छेदकभेदे
नतदुत्पत्तौवाधकाभावइतिवाच्यं। फलस्यसंदेहग्रस्ततयावच्छेदकांतर्भावेगौर
वात्। अतएवफलानुरोधेनतादृशभ्रमजनकदोषादेरुत्तेजकतयातदुपपादनमपि

निरस्तं। फलस्य संदिग्धत्वात्। नचैवमव्याप्यवृत्तित्वस्यैवावच्छेदकमंतर्भाव्य प्रतिवंधकतया
तदुपपादनमपि निरस्तं। फलस्य संदिग्धत्वात्। नचैवमव्याप्यवृत्तित्वस्यैवावच्छेदकमं
तर्भाव्य प्रतिवंधकतानुपपत्तिरिति वाच्यं। तत्र फलस्य सर्वानुभवसिद्धतया गौरवस्य
प्रामाणिकत्वात्। अथ विरोधसंवंधेन प्रतियोगिमत्तानिश्चयं प्रतिवंधकः। विरोधश्च
तत्र स्वसमानाधिकरणवृत्तित्वविशिष्टसमवायादिः। स च धर्मिप्रकारयोर्भेदः। तथा चाव्याप्य
वृत्तावव्याप्यवृत्तित्वभ्रमस्याबाधकाभाव इति चेन्न। तथा सति विरोधसंवंधेन यस्य कस्यापि नि
श्चयस्य प्रतिवंधकतया प्रतियोगिमत्तानिश्चयस्य पक्षधर्मतानिश्चयाविरोधापत्तेः। एक
वेन प्रतिवंधकतया सर्वनिर्वाहे व्यावर्तकधर्मदर्शनादीनां सकलसंमततायाः पृथक्प्रति
वंधकतानुपपत्तेः। स्वाधाशयेन भेदस्याव्याप्यवृत्तित्वेऽव्याप्यवृत्तित्वं भ्रमासंभवमा
शंक्याह अन्योन्याभावस्येत्यादि। सुतरां निर्विवाद। पूर्वकल्पे तु व्याप्यवृत्तित्वभ्रमव्यवस्था
पनं विना न विशेषदर्शनमत्र निर्विवादमेवेति भाव इति प्राहुः। गौरवमिति नचैवमपि

भवानं·पी· संयोगीसत्त्वादित्यादावतिव्याप्तिः संयोगिभेदस्य प्रतियोगिवृत्तित्वस्याव्याप्यवृत्तित्वे संयोगि
१४ द्रव्यत्वादित्यादावव्याप्तिरितिवाच्यं। हेत्वधिकरणावच्छेदेन प्रतियोग्यवृत्तित्वस्य हेतुसमाना
14 धिकरणांतेन विवक्षणात्। वस्तुतस्तु प्रतियोगिवृत्तित्वं नाव्याप्यवृत्तित्वत्राव्याप्यवृत्तित्वसा
धकप्रतीतेः सिद्धांतलक्षणे कपीत्यादावव्याप्त्युपपादनसंभवादिति संयोगीसत्त्वादित्यादावति
व्याप्तिर्दुर्वारैवेत्याशयेन द्वंद्वं पुनरिहावधेयमित्यादि दीधितिकारेणैव वक्ष्यतीति। ध्येयं। दीधि
तो नञ्चेत्तिनवेत्यर्थः। इदं च भेदत्वमखंडोपाधिरित्याशयेन अन्यथा तादात्म्यसंबंधावच्छि
न्नप्रतियोगिताकत्वरूपभेदत्वनिवेशे प्रतियोगितावच्छेदकसंबंधानिवेशप्रयुक्तलाघवा राम
संभवादिति ध्येयं। व्याख्यायां तदपि लाघवमित्यर्थः। तादृशात्यंताभावेति साध्यता
वच्छेदकसंयोगसंबंधावच्छिन्नप्रतियोगिताकविषयत्वादिनावह्निमद्वृत्त्यात्यंताभावे
त्यर्थः। प्रतियोगितावच्छेदकरूपेति संयोगेन वह्निसाध्यकेऽव्याप्यवारणाय विशेषः। तादृशा
वच्छेदकत्वस्य तादृशप्रतियोगितावच्छेदकत्वस्य गौरवादिति। तथा चात्यंताभावघटि

३

तत्प्रतियोगितायास्तदवच्छेदकतायां वसंबंधविशेषावच्छिन्नत्वं निवेश्यं भेदघटिते च प्र
तियोगितावच्छेदकतायामेवेति लाघवं । न च भेदघटितेपि तन्नत्साध्यवद्वृत्तिभेदस्याप्र
याप्यावाच्यात्मस्य साध्यतावच्छेदके प्रतियोगितावच्छेदकतानवच्छेदकत्वं निवेश्यं तत्प्रति
योग्यवच्छेदकत्वं च साध्यतावच्छेदकताघटकसंबंधेन वाच्यम् अव्याप्तौ क्रमशोऽव्याप्त्यापत्ते
रिति वाच्यं । विषयतया वह्नित्ववज्ज्ञानादिना संयोगेन विशिष्टस्याप्रसिद्ध्या भेदघटि
ते तद्भिन्नवृत्त्यभावस्याभावात् । न च गुणत्ववान्द्रव्यत्वादित्यादौ विषयतया गुणत्ववज्ज्ञाना
दिना समवायेन विशिष्टस्याप्रसिद्ध्या भेदघटिते तद्भिन्नवृत्त्य ~~स्याभावात्~~ मावश्य
कमिति वाच्यं । एवमपि साध्यसाधनभेदेन व्याप्तेर्भिन्नतया संयोगेन वह्निसाध्यके उक्तला
घवानपाय इत्याशयात् । न च साध्यतावच्छेदकसंबंधेन प्रतियोग्यसामानाधिकरण्य
निवेशोऽस्यां ताभावघटितेपि प्रतियोगितावच्छेदकसंबंधभेदानुधावनमिति वाच्यं । ए
वमपि भेदघटिते प्रतियोग्यधिकरणस्याप्रवेशेन प्रतियोगितावच्छेदकसंबंधेन सा

ध्यतावच्छेदकसंबंधेनवाप्रतियोग्यधिकरणत्वनिवेशप्रयुक्तलाघवानपायात्। निष्ठ
त्वायां विशेषणताविशेषणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये विशेषणतावि
शेषेण साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकावच्छिन्नत्वाभावघटितायां। प्रति
योगिव्यधिकरणत्वादेरिति। यत्तु विशेषणताविशेषणस्याव्याप्यवृत्तित्वभ्रमकाले अनु
मित्युपपत्तये तद्गर्भायामपि तन्निवेश आवश्यक इति दूषणं भावनं तत्र सम्यक् अप्र
वेशादिस्वस्वतद्गर्भायां स्वरूपतः प्रवेशाभावतात्पर्यकत्वेन भेदघटिते च स्वरूपतो
ऽपि प्रवेशेन सामंजस्यात्। कुतो लाघवमिति न च भेदघटिते विशेषणताविशेषा
निवेशादेव लाघवमिति वाच्यं। भेदत्वस्याखंडोपाधिरूपत्वे मानाभावेन तादात्म्य
संबंधावच्छिन्नप्रतियोगिताकत्वनिवेशेन प्रतियोग्यवृत्तित्वनिवेशेन च साध्यतावच्छे
दके तादृशप्रतियोगितावच्छेदकतानवच्छेदकत्वनिवेशेन च लाघवासंभव इत्याशा
मात्रं। मान्यास्तु। यथाश्रुतेति अपरे त्वित्यादिवद्ध्यमास्मताद्युत्कर्षप्रतिपादना

यत्तन्मते अन्योन्याभावगर्भैवेति ग्रंथस्योपलक्षणत्वपरतायां बुध्यमानत्वादिति प्राहुः।
॥ अव्यवहितोत्तरत्वस्यापि तन्निष्ठप्रकारिताघटितत्वादाह। तन्निष्ठप्रकारित्वं चेति। अत्रेन्द्रियसंयो
गादेर्दृष्टान्तत्वं लौकिकविषयतानंगीकारपक्षे अन्यथा चक्षुःसंयोगादेर्व्याप्तेर्लौकिकचाक्षुषत्वा
द्यवच्छिन्ने हेतुत्वसंभवात्। यद्वा कार्यकारणभावविशेषस्य एव दृष्टान्तत्वं न तु कार्यतावच्छेदकांशे
पीति ध्येयं। यद्रूपमिति यद्रूपपदार्थ इत्यर्थः। अन्वय इति अन्यतान्योन्याभावयोरित्यादिः। ननु
व्यतिरेकिण्यसाध्याद्यभावसामानाधिकरण्यस्य हेतावभावेन तद्ग्रहस्य भ्रमत्वरूपत्वमेवेति
केवलान्वयिस्थले चेति विशिष्योक्तिरसंगतेत्यत आह। व्यतिरेकिणीति। प्रसिद्धमिति सा
ध्याद्यभाववद्वृत्तिपदार्थ इत्यादिः। न संभवतीति साध्याद्यभावस्यैवाप्रसिद्धत्वादिति भा
वः। उक्तमिति केवलान्वयिस्थले चेति विशिष्योक्तमित्यर्थः। एवं च दीधितेर्भ्रमरूपस्यैवेत्य
स्य साध्याद्यभावांश इत्यादि तद्ग्रहस्य तादृशसाध्याद्यभावसामानाधिकरण्यावगाहित्वग्रह

स्य। प्राचीनमतेयत्वतत्वयोरनुगमाभावात्। एवमिति। व्याप्त्यादिग्रहवृत्तित्वित्यादिसाध्याभा
वसामानाधिकरण्याभावव्याप्यवत्तादिग्रहे नातिप्रसंग इति भावः। अतएवभिन्नप्रकारक
ज्ञानस्यविरोधित्वाभावेनसमानप्रकारकत्वेनविरोधित्वस्य स्वरूपार्थमेव। ज्ञानानुगमसि
ति पूर्वोपदर्शितमितिशेषः। हेतौ साध्याभाववद्वृत्त्यादिहेतुतावच्छेदकविशिष्टत्वादि अ
न्यथा निर्धर्मितावच्छेदकस्य तस्याप्रतिबध्यत्वादसंभवापत्तेः यदि चानुभवत्वाद्व्यापकतावगा
हत्यपि ग्रहोनुमितिहेतुस्तदाह बोधकग्रहसमूहालंबनात्मक एवायं ग्रहो ग्राह्यः साध्याभावव
द्वृत्तित्वाद्यवगाहि ज्ञानसंग्रहायसमानप्रकारकत्वेनविरोधित्वस्य स्वरूपार्थमेवचेद्ग्रहाभिधान
मितिव्याख्यायां। असंगतइतिएवकारेणस्वंताभावगर्भव्याप्तिव्यवच्छेदादिति भावः। लक्षण
येति। लक्षणद्वयव्याप्तिपदे अन्योन्यपदेवा केचित्तु एवकारस्याप्यर्थकतयोपलक्षणपरत्व
मित्याहुः। विशेषनिषेधस्येति। मूले अनौपाधिकत्वं तु तल्लक्षणमित्यत्र लक्षणशब्दस्य ज्ञाप

कपरतया नोपाधिकत्वरूपविशेषस्य व्याप्तिज्ञापकत्वोक्त्यातस्यानुमितिहेतुत्वनिषेधत्लाभे
न तद्भिन्नानां संभवद्व्याप्तित्वकानां व्याप्तित्वाभ्यनुज्ञानादितिभावः। उचितमितिसंदेहेत्ला
घवस्यैव निर्णायकत्वादितिभावः। अप्रसिद्धिरिति। समूहालंबनग्रहत्वस्य प्रतिबध्यतान
वच्छेदकत्वादितिभावः। ननुतादृशावगाहित्वप्रसिद्ध्यर्थमेवसमूहालंबनपर्यंतानुसरणम
तआह। लाघवादिति। अत्रेष्टापत्तिमाशंक्याह। नचेतितदपि तादृशव्याप्तिज्ञानद्वयान्यत
रत्वादिनैव हेतुत्वमपि। तादृशाभेदयोरेकत्रद्वयमितिन्यायेनव्यासज्यवृत्त्यवच्छेदकतास्वीका
रेणविनिगमनाविरहइत्यतआह। गौरवेणचेति लाघवात्। शरीरलाघवात्। उपस्थि
तिलाघवमप्याह। अथमैति। ननुप्रातिस्विकरूपेणहेतुत्वे परस्परजन्यानुमितौव्यभि
चारइत्यतआह। विभिन्नेतिअत्रेतन्मतेअन्योन्याभावगर्भेवेत्यादिग्रंथस्योपलक्ष
णपरत्वेयथाश्रुतासंगतिरित्यपिदूषणं द्रष्टव्यं। समाधानग्रंथं। तज्ज्ञानमुपजी
व्यमपीत्यादिग्रंथं। तात्पर्यार्थमिति। हेतुधर्मिकसोपाधित्वज्ञानस्यव्याप्तिधीविरोधि

भवानं. दी.
१७
17

त्वेन ग्रहणस्येत्यादि। यथाश्रुतमूलतात्पर्यस्योपाधिधर्मिकसाध्यव्यापकत्वादिज्ञानस्याभिन्नधर्मि
कतया हेतौ व्याप्तिग्रहाविरोधित्वस्यासंगतिरेवं पूर्वपक्षे व्यभिचाराज्ञानस्य व्याप्तिज्ञानहे
तुत्वे तु ननु एकेनेन व्यभिचाराज्ञानस्येत्यादिमूलमप्यभुक्तवांतमिवेत्यतस्तन्मुद्रितप्रघट्ट
कार्थमस्पष्टत्वात्पर्याभ्यां वदतीत्याशयः। विवक्षितार्थ। तथात्वेपीत्यादिना वक्ष्यमाणमर्थं
विवक्षितार्थमेवाह दीधितौ। तथात्वेपीति। वस्तुतस्तु। ननु सोपाधित्वज्ञानं व्याप्तिबुद्धिप्र
ति व्यभिचारज्ञानद्वाराप्रतिबंधकमिति यदुक्तं तन्न संगच्छते साध्याद्यविरोधिनो ज्ञानस्य ज
नकीभूतज्ञानविघटकतयैव प्रतिबंधकत्वमिति नियमात्। तथा च निरुपाधित्वज्ञानं व्या
प्तिबुद्धिं प्रति कारणं तद्विघटनद्वारा सोपाधित्वज्ञानस्य प्रतिबंधकत्वं वक्तुमुचितमित्य राम
त आह दीधितौ निरुपाधित्वस्येति। तथा च सोपाधित्वज्ञानं व्यभिचारज्ञानद्वारा व्याप्ति १७
बुद्धिप्रतिबंधकमित्यस्य व्याप्तिबुद्धिं प्रतिबंधकीभूतव्यभिचारज्ञानं प्रत्येव जनकत्वं
न तु तद्द्वारा तत्र प्रतिबंधकत्वं तस्येत्यर्थः। निरुपाधित्वज्ञानस्य व्याप्तिबुद्धिं प्रति हेतुत्वे

स्वीकृत्य निरुपाधित्वज्ञानविघटनद्वारा सोपाधित्वज्ञानस्य व्याप्तिबुद्धौ प्रतिबंधकत्वं स्वी
कृत्याह तथात्वेपीति सोपाधित्वज्ञानस्य निरुपाधित्वज्ञानविघटनद्वारा व्याप्तिबु
द्धौ प्रतिबंधकत्वेपीत्यर्थः उपाधेरिति तथा च हेत्वासंभवे सामान्यलक्षणस्य व्या
प्तिप्रतिबंधकत्वं तज्जनकाप्रतिबंधकत्वे सति तत्प्रतिबंधकत्वमित्यर्थ इति भावः आख्या
यां अन्योन्याभावघटितेति तथा च प्रतियोग्यनधिकरणवृत्तित्वविशेषितात्यंताभा
वगर्भस्यासंग्रह इति भावः। प्रागुक्तरीत्येति सिद्धांतलक्षणे कृतरीत्येत्यर्थः गुण
घवच्छेदेनापीति। तथा च संयोगिभेदे गुणत्वेन संयोगिवृत्तित्वमित्यादि प्रतीति
र्गुणत्वे संयोगिभेदनिष्ठसंयोगिवृत्तिताघवच्छेदकत्वाभावविषयिणी न तु गुणत्वा
घवच्छेदेन संयोगिभेदे संयोगिवृत्तिताघभावविषयिणीति भावः। संयोगि
रूपेति वस्तुगत्या संयोगिरूपो यः प्रतियोगी तद्भिन्नत्वादित्यर्थः अथ यादृश
प्रतियोगितावच्छिन्नप्रतियोगिताकप्रतियोगितावच्छेदकाधिकरणं हेत्वधिकरणं

भवानं.पी. १८ 18

हेतुत्व तद्वृत्यन्योन्याभावीयतादृशप्रतियोगितानवच्छेदकं यत्साध्यं तत्सामानाधिकरण्यं
मित्युक्तौ नोक्ताव्याप्तिः द्रव्यं संयोगिभिन्नमिति प्रतीतिसत्वेपि द्रव्यं संयोगिभेदप्रतियो
गितावच्छिन्नमिति प्रतीतेरभावादिति चेन्न। प्रतियोगितायाः प्रतियोगितावच्छेदकानति
रिक्ततया संयोगिभेदप्रतियोगितावच्छिन्नभेदस्यापि संयोगावच्छिन्नभेदपर्यवसि
ततया तस्यापि द्रव्ये सत्वात्। समानदेशकालावच्छिन्नयोरेवावच्छेद्यावच्छेदकभावेन
संयोगावच्छेदकावच्छेदेन संयोगावच्छिन्नप्रतियोगितायाः असंभवेन तदवच्छेदेन सं राम
योगिभेदप्रतियोगितावच्छिन्नभेदस्यावश्यकत्वात्। तादृशेति प्रतियोग्यवृत्तीत्य १८
र्थः नातिव्याप्तिरिति। सत्तावत्त्रिष्ठप्रतियोग्यवृत्ति द्रव्यादिभेदप्रतियोगितावच्छेदकद्रव्य
त्वादेः। संयोगत्वविशिष्टसंबंधिनिष्ठतादृशभेदप्रतियोगितानवच्छेदकत्वेन संयोगा
त्वस्य पारिभाषिकावच्छेदकत्वानपायादिति भावः अप्रसिद्धेरिति संयोगेन द्रव्यसा
व्याप्यवृत्तितया संयोगावच्छिन्नतदवच्छेदस्याप्यव्याप्यवृत्तित्वादिति भावः संयोगेन द्र

अस्याव्याप्यवृत्तितानभ्युपगमे त्वाह प्रतियोग्यवृत्तीति । वैयर्थ्यं चेति। संयोगिसत्वादित्या
देरेतद्व्यादिभेदमादाय एवातिव्याप्त्यभावाद्धूमवान्वह्नेरित्यादौ च धूमादिमदन्यो
भाववमादाय धूमत्वादेः पारिभाषिकावच्छेदकत्वादेवातिव्याप्त्यभावादिति भावः।
पूर्वकल्पे संयोगेनतदस्याव्याप्यवृत्तित्वाभ्युपगमे संयोगेन साध्यतायां साध्य
तावच्छेदकस्यावच्छेदकत्व वारणाय तत्पदसार्थक्यं संभवति एतत्कल्पे च तदभ्युप
गमेपि तद्वैयर्थ्यमित्याशयेनाह सुतरामिति वस्तुतस्तु पूर्वकल्पे संयोगेनतदस्य
दैशिककालिकाव्याप्यवृत्तित्वयोरनुपगमोपगमयोरवच्छेदकत्वतत्पदयोः क्रमादिसा
तत्पदसार्थक्यमेतत्कल्पे सर्वथा तद्वैयर्थ्यमित्यभिप्रायकं सुतरामिति ध्येयं।
अपरे तु पूर्वकल्पेऽव्याप्तिसमुच्चितस्य तद्वैयर्थ्यस्य दोषतया तद्वैयर्थ्येन निर्भरः
एतत्कल्पे च तद्वैयर्थ्यस्यैव दोषतया तत्रैव निर्भर इत्याशयेन सुतरामित्युक्तमित्याश

यइत्याहुः। अरजवस्तु अव्याप्तिः मुक्ता दूषणं तरमाह प्रतियोग्यवृत्तीति। अव्याप्तिवार
कतयैव हि तस्य रसार्थक्यं संभवति तत्परिहारोपादानेपि ऽकरीत्याऽव्याप्तिसत्वेन तस्य रसार्थ
क्यासंभवान्नैवैयर्थ्यमिति भावः सुतरामिति पूर्वकल्पेऽवच्छेदकाप्रसिद्धिनिबंधनाव्या
प्तिवारणाय तस्य रसार्थक्यमित्यापाततो वक्तुं शक्यं एतत्कल्पे वाव्याप्तिसंभावनाया
अभावात् तद्वारकतस्य वैयर्थ्यं दुष्परमिति भावइत्याहुः। अव्यवहितं वैस्तुधीभिरूह्यं आ
वृत्त्यैवेति। तथाच पारिभाषिकावच्छेदकत्वस्यैवात्रि वेशनोक्तरीत्याति व्याप्तिपरिहा
रासंभवइति भावः आप्यवृत्तीति अत्र व्याप्यवृत्तित्वं हेत्वधिकरणं तन्भो वेनवक्तव्यं ते
नसंयोगाभाववान्गुणत्वादित्यादावपि प्रतियोग्यवृत्तित्वाघप्रवेशान्नत्संग्रहः अप्र 
वेशादिति व्याप्तित्वस्यतोऽप्रवेशादित्यर्थः। तेनानुमितिजनकज्ञानविषयता
वच्छेदककोटावुपदर्शितरीत्याप्रवेशेपि न क्षतिः। तद्व्यापकं। तद्व्याप्यव्यापकतावच्छेद

साध्यतावच्छेदकावच्छिन्नं तेनैतन्नाव्याप्तिः साध्यके न दोषः। उभयत्र एतत्तन्न्यूनत्वे मिम
लक्ष्ये संयुक्ते धिताव्याप्यवृत्तिसंयोगादीति। अत्राव्याप्यवृत्तित्वमपि हेत्वधिकरणं तद्भावे
न दोषः। तेन संयोगाभावस्यानुगमत्वात्त्वाद्यवृत्तिरत एव संयोगादौ तु क्तं। स्वं स्वीयं ते
न स्वपदस्य साध्यपदेतायां न त्वपुनरुक्तिभंगः अत एवात्र स्वसाध्ये स्वे वपाठः। अन्यथा पुनरु
क्तिभंगापत्तेरित्यपि निरस्तं। व्याख्यायां नास्ति व्याप्तिरिति। न चैवमप्यसामानाधिकरण्यं
हेतुतावच्छेदकसंबंधघटितमेव वा समन्वयासमवायादिघटितसामानाधिकरण्यस्य
धूमादेरसत्त्वेनाव्याप्त्यापत्तेस्तथा च संतावानुमितेरित्याद्यप्रसिद्ध्याऽव्याप्तिरिति वाच्यं।
तादृशासत्त्वं तामादेहेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यस्य विवक्षितत्वात्। अ
त एव द्रव्यं विशिष्टसत्त्वादित्यादावपि नाव्याप्तिः संयोगिद्रव्यत्वादित्यादौ स्वसमाना
धिकरणात्यन्ताभावप्रतियोगितानवच्छेदकद्रव्यत्वाद्यवच्छिन्नाप्रसिद्धताभावस्य द्रव्य
त्वाद्यधिकरणे स्वावयवविनिसत्त्वेनाव्याप्तेराह प्रतियोगितावच्छेदकतानवच्छेदकरूपेति

भो॰वा॰दी॰ ।इत्यपेक्ष्यव्यापकतावच्छेदकरूपघटितनिरुक्तलक्षणमपेक्ष्यात्लघुतरमिति।व्यापा
२० कतावच्छेदकरूपघटितलक्षणेऽपेक्ष्यव्यापकरूपघटितेतल्लक्षणस्यलघुत्वादि
20 तिभावः।तथैव।व्यापकरूपघटितलघुलक्षणमेव।नन्वेतल्लक्षणेव्यापकताव
च्छेदकरूपविशिष्टत्वेनव्यापकरूपस्यप्रवेशेनपूर्वलक्षणान्नलघुत्वंप्रत्युतगुरु
त्वमेवेत्यतआहइदंत्विति।वस्तुकथनमिति।व्यापकरूपस्यवस्तुगत्याव्यापकता
वच्छेदकरूपविशिष्टत्वादितिभावः।अनेनव्यापकतावच्छेदकरूपविशिष्टत्वेन।उ
क्तमेव।निरुक्तव्यापकरूपघटितमेव।दीधितिकारेणस्मृतिसाहित्येनाकालिकाव्या
प्यवृत्तिकेवलान्वयिसाध्यकेऽव्याप्तिरिति।तत्रदैशिकाव्याप्यवृत्तिकेवलान्वयिसंयो रा॰म॰
गाभावादिसाध्यकोपेक्ष्याबीजमाह।अन्योन्याभावस्येतितस्यदैशिकमव्याप्यवृत्ति २०
त्वमुपगच्छतांमतेसंयोगाभाववान्मेयत्वादित्यादौसत्त्वव्यापकसाध्येस्यादितिलक्षण
स्यनाव्याप्तत्वंमेयत्वाधिकरणवृक्षादौशाखाद्यवच्छेदेनसंयोगाभाववदन्योन्या

भावसत्वादत्र आत्मदैशिकामिति। संयोगाभावसाध्यके संयोगाभावादिसाध्यके तदुपेक्ष्यदैशिकाव्याप्यवृत्तिकेवलान्वयिसंयोगाभावादिसाध्यकमुपेक्ष्य यद्यपि संयोगाभावादिसाध्यकगुणत्वादिहेतौ गतिसत्वेन। तदुपेक्ष्यसेपि तत्साध्यकहेतुमात्रे एवंगतस्याभावासंभवेन स्मृतिविषयत्वादिसाध्यकहेतुमात्रे तत्संभवेनाणुरूपीति न्यायेन तदुपेक्ष्ये ति ध्येयं। वस्तुतस्तत्र व्याप्यवृत्तित्वाव्याप्यवृत्तित्वे ऽन्योन्याभाव घटितत्वे एवं च संयोगाभावसाध्यकसर्वहेतौ रेव व्याप्यवृत्तिसाध्यकत्वेन उक्तगतेरसंभवात्तदुपेक्ष्या। संयोगवद्भेदस्य कालिकाव्याप्यवृत्तित्वेनाव्याप्यवृत्तिसंयोगादिसाध्यक इति दीधितेरसंगतिरित्यादिकमग्रिममिति प्रतिभाति अन्यत्र। कालिकाव्याप्यवृत्तिकेवलान्वयिसाध्यके उद्बोधकाधीनत्वेनेति सार्वत्रिकत्वानियमादित्य[illegible]त्रिमेलग्नत्वयः सार्वत्रिकत्वानियमादिति। तथा च स्मृतिविषयत्वस्य संस्कारविषयत्वस्य च केवलान्वयित्वं न संभवतीति परित्यागइति भावः अन्यत्रान्वेतीति। अत्र अन्यत्राभावविषय

भवा०टी०

२१ स्याप्रामाणिकत्वेन जन्यज्ञानविषयत्वं केवलान्वयीति ध्येयं। सर्वदैवेति तथा च तस्य
न्नाव्याप्यवृत्तित्वमिति तत्सरित्वाग इति भावः। अत्र ज्ञानपदं विषयत्वस्य ज्ञानस्वरूपत्व
५ लाभाय विषयस्वरूपत्वे तस्य व्याप्यवृत्तित्वेनाव्याप्यवृत्तित्वासंभवादिति ध्येयं। दीधि
तौ केवलान्वयिसाध्यकेषु कालिकाव्याप्यवृत्तिकेवलान्वयिसाध्यकेषु व्याप्यवृत्तिसा
ध्यके दैशिकाव्याप्यवृत्तिसाध्यके च प्रथमलक्षणस्य व्यतिरेकिसाध्यके द्वितीयलक्ष
णस्यासंभवान्न लक्षणद्वयानुसरणं। काणतिरिति। कृष्णमव्याप्तिमुधारः अव्याप्तिमे
वोपपादयति। व्याख्यायां तस्य चेति जन्यद्रव्यस्य प्रलयकाले असंबद्धतया तन्निष्ठा
भावस्य तत्कालावच्छेदेनासंभवाद्गह व्योमादाविति। स्वात्मकाव्याप्यवृत्तिकेवलान्वयि राम
नः। स्वव्यापकत्वासंभवादाह व्याप्यवृत्तिकेवलान्वय्यंतरस्येति। प्रमेयत्वादेरित्यर्थः २१
। इदमुपलक्षणं तादृशकेवलान्वय्यंतरवद्व्योमाभावाप्रसिद्ध्या चेत्यपि द्रष्टव्यं। त
द्भावासंभवस्येति। प्रमेयत्वादेरित्यर्थः। इदमुपलक्षणं तादृशकेवलान्वय्यंतर

वद्न्योन्याभावाप्रसिद्ध्यावेत्यपि दूषणं । तदभावाभावसंभवेपि गगनाभाववद्न्योन्याभा
वाप्रसिद्ध्याव्याप्तेर्दुर्वारत्वादिति ध्येयं । वन्ह्यधिकरणेति पर्वतादौ त्विति शेषः अव्याप्तेरिति । न
नु स्वाधिकरणे यत्किंचिद्व्यक्तिवृत्तितानवच्छेदकधर्मावच्छिन्नप्रतियोगितावच्छेदकताक
त्वविवक्षणेनाव्याप्तिरितिवाच्यं । गौरवात् । न च भवन्मतेपि विशिष्टसत्तावाञ्जाते
रित्यत्रातिव्याप्तिवारणाय यतादृशायात्किंचिद्व्यक्तिवृत्तितावच्छेदकधर्मानवच्छिन्नप्रतियो
गितावच्छेदकताकत्वविवक्षणे साम्यमिति वाच्यं । यादृशधर्मस्य हेत्वधिकरणवृत्तित्वं
तादृशधर्मपर्याप्तावच्छेदकताकान्यत्वस्य प्रतियोगिताविशेषणत्वेनैव गुणादिवृ
त्तिसत्तापर्याप्तावच्छेदकताकान्यप्रतियोगिताकविशिष्टसत्तावद्भेदमादाय नातिव्याप्ति
वारणात् । अत एव वह्निमान्धूमादित्यादौ घटादिमद्भेदघटमेयत्वाद्यन्यतरवद्भे
दयोरभेदेपि घटादिमद्भेदस्य तादृशधर्ममेयत्वादिपर्याप्तावच्छेदकताकान्यघटा
घवच्छिन्नप्रतियोगिताकत्वसंभवान्न तादृशाभावाप्रसिद्धिः गगनादिमद्भेद एवेति

अन्यभेदप्रतियोगितावच्छेदकानां हेत्वधिकरणकालवृत्तित्वयान्यभेदस्य लक्षणघटकत्वा
संभवादिति भावः। यत्किंचिद्व्यक्तिसमवेतधर्मानवच्छिन्नप्रतियोगिताक इति पाठः। य
त्किंचिद्व्यक्त्यसमवेतधर्मावच्छिन्नप्रतियोगिताक इति पाठेपि स एवार्थः। तथैव लक्षणे नि
वेशात् तेन तेन संबंधेनेति। अनवच्छिन्नेत्यस्यैकदेशेनावच्छेदकत्वेनान्वितं तत्तीयाप्यऽ
वच्छिन्नत्वं। तथा च तत्संबंधावच्छिन्नावच्छेदकत्वानिरूपकप्रतियोगिताकेति लब्धं। घ
टद्वयस्यापि गुणः स्पंदत्वात् जातिमान्मेयत्वादित्यत्रातिव्याप्तिरूपदोषद्वयस्यापि नि
यामकसंबंधेनेति। समवायेन स्वरूपसंबंधेन चेति शेषः अप्रसिद्धिरिति। यत्तु स्वाधि
करणयत्किंचिद्व्यक्त्यप्रतियोगिकभेदप्रतियोगितानवच्छेदकसाध्यवत्वकत्वोक्तौ न को 
पि दोष इति तन्न तस्य लक्षणांतरत्वात्। दीधितौ एवमत्यंताभावगर्भेत्यादिरेव पाठ इत्या 
शयेनाह। एवमिति। एवं तथात्वेत्यंताभावगर्भेत्यादिपाठे तथात्वे इत्यस्यैवान्योन्याभा
वस्याव्यवृत्तित्वे इत्यर्थे विरोध्यः संयोगानधिकरणत्वस्येति। इदं चाव्याप्यवृत्तेरधिकरण

ताप्यव्याप्यवृत्तिरित्याशयेन। न च प्रतियोग्यधिकरणं यद्घटत्वव्यक्तित्वावच्छिन्नप्रतियो
गिताकभेदकूटवत्त्वविवक्षणे न दोष इति वाच्यं। भेदकूटस्य दुर्ज्ञेयत्वात्। अत एवेति
। विशिष्टस्यानतिरिक्ततया विशिष्टसत्ताभावस्य गुणे वृत्तिप्रतियोगिकत्वाभावेऽपि
गुणे वृत्तितानवच्छेदकविशिष्टसत्तात्वावच्छिन्नप्रतियोगिताकत्वादिति भावः। घटाभा
वस्यापीति। संयोगावच्छिन्नप्रतियोगिताकस्येत्यादि घटमेयत्वान्यतराभावेति
संयोगावच्छिन्नप्रतियोगिताकेत्यादि तादृशाभावाप्रसिद्धेरिति। न च तादृशयत्किं
चिद्व्यक्तिवृत्त्यप्रतियोगिकत्वं तादृशवृत्तितावच्छेदकानवच्छिन्नप्रतियोगिताकत्व
मेवेति नाप्रसिद्धिः घटघटाभावस्य तादृशवृत्तितावच्छेदकतादृशान्यतरत्वाद्य
वच्छिन्नघटत्वाद्यवच्छिन्नप्रतियोगिताकत्वादिति वाच्यं। प्रतियोगिताया अभाव
स्वरूपत्वे अभावयोरैक्ये घटत्वाद्यवच्छिन्नप्रतियोगिताया अपि तादृशान्यतरत्वा
द्यवच्छिन्नप्रतियोगिताकत्वाप्रसिद्धिर्दुर्वारैवेत्याशयात्। न च तथापि साध्यतावच्छे

भवा·टी०
२३
23

एकसंबंधेन यत्किंचिद्व्यक्तिवृत्तित्वोक्तौ नाप्रसिद्धिरिति भावः । तथा सति वह्न्यभावादिशा
जातिमान्मेयत्वादित्यादावतिव्याप्त्यापत्तेः । यत्तु मान्यैरुक्तं विशिष्टसत्ताभावाज्जातेरित्या
दावतिव्याप्त्यापत्त्या तादृशयत्किंचिद्व्यक्तिवृत्त्यप्रतियोगिकेति नोक्तमिति यद्यपि तादृक्
च वक्तुं बीजैर्भिरुक्तं धूमवद्वह्निसामान्योभयाभावस्य धूमाभावाभिन्नतया धूमाभावेऽपि
न्नायोगोलकवृत्त्यप्रतियोगिक इति धूमवान्वह्नेरित्यादावतिव्याप्त्या तादृशयत्किंचि
द्व्यक्त्यवृत्तिप्रतियोगिकेति न कृतमिति तदुभयमप्यसत् । तत्र तादृशाभावाप्रसिद्धे
वातिव्याप्त्यतादृशयत्किंचिद्व्यक्त्यवृत्तिप्रतियोगिकेति न कृतमिति तदुभयमप्यसत् । राम २३
तत्र तादृशाभावाप्रसिद्धेवातिव्याप्त्यसंभवात् । पूर्ववदित्तीति । यत्तु इदं तादृशयत्किं
चिद्व्यक्तिवृत्त्यप्रतियोगिकेति पाठाभिप्रायेणैवसंगच्छते अन्यथा यथाकथंचि
त्संबंधेन गुणत्वस्य स्पंदावृत्तितया तत्प्रतियोगिकाभावसंग्रहे उक्तदोषासंगतेः न
चाप्रसिद्धिः तादृशावृत्तितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यैव विवक्षणादिति त

तुच्छं। कालिकसंबंधेन गुणत्वस्य स्वस्य स्ववृत्तित्वेपि तथा कथंचित्संबंधेन स्वं स्ववृत्तित्वासंभवात्
ऽपदर्शितेत्युक्तविवक्षया मध्यप्रसिद्धेर्दुर्वारत्वाच्च। इतरथा तु। आधिक्यलक्षणेऽतिव्या
प्तिरपेक्ष्यसेतु। तादृशनिरूपकत्वं। स्वप्रतियोगिनि छाधेयतानिरूपकत्वं। अत्रावच्छेदे
न प्रतियोग्यनधिकरणदेशावच्छेदेन व्याख्यानं। तादृशनिरूपकत्वस्याव्याप्यवृत्तित्व
पक्षे एवैतद्व्याख्याभिप्रायकव्याख्यानं। तत्कल्पे तादृशनिरूपकत्वस्याव्याप्यवृत्तित्व
कल्पे। पृथक्शंकानुत्थानादिति। तथा च तत्कल्पे पृथक्शंकानुदयेन पृथक्दोष
दानासंगतिरिति भावः। प्रथमे। यावत्साध्यव्यापकत्वरूपानोपाधिकत्वे। स्वस
मानेतीति अत्रावच्छेदकत्वद्वयमपहाय तादृशप्रतियोगितात्वव्यापकतादृशप्रति
योगितावत्कत्वमित्यतिलघुपि लक्षणं संभवतीति ध्येयं। अपेक्षाबुद्धिविशेष
विषयत्वरूपं सर्वत्वं व्यापकत्वादन्यत्तु वचमत आह। व्यापकेरिति। स्वनिरूपकेति। अ

त्वयघभावत्वंस्वरूपसंबंधविशेषरूपंतत्तत्स्याभावरूपतयातन्निरूपकत्वंप्रतियोगिनिते
तुसामानाधिकरण्येस्वरसतएवनिर्वहतिइतरथातु अभावस्यैवाभावत्वस्यापिप्रति
योगीनिरूपकः एतदीयोऽभावइतिवत् एतदीयमभावत्वमितिप्रतीतेरविशेषादितिपा
शयेनेदं।वस्तुतस्तुपरंपरयानिरूपकत्वमत्राभिप्रेतंतथाचात्रस्वनिरूपकत्वंस्वाश्रय
निरूपकत्वपर्यवसन्नमितिध्येयं।नसंभवतीतिसाध्यसामानाधिकरण्यमात्रस्यै
वचात्रनीत्यावेतहेतुसामानाधिकरण्यसमानाधिकरणान्योन्याभावप्रतियोगिता
वच्छेदकत्वादितिभावः अभावस्याखंडत्वादिति।तथाचहेतुसामानाधिकरण्यस्यप्रतियोगि राम
नोभेदेपिनक्षतिरितिभावः।इत्यलोपि।एतादृशलाघवादपि।एवमभिधानंसाध्यसामा २४
नाधिकरण्याभावघटितत्वेनाप्यलाभिधानं।ननुयघन्योन्याभावघटितव्यापकत्वनि
वेशाभिप्रायकमिदंलक्षणंतदादीधितौव्यापकतावच्छेदकत्वप्रवेशोऽसंगतइत्यत

आह। तादृशेति। दीधितावित्यादितत्। लक्षणं। तार्किकचक्रवर्त्तिवस्तुसाधनस्यापि साधन
समानाधिकरणतया सर्वस्मिन् धर्मे वह्निसामानाधिकरण्यग्रहं विनाऽभावाघटि
तं पूर्वोक्तलक्षणं दुर्ग्रहमतोनापत्यागुर्वपि साध्यसामानाधिकरण्याभावघटितं
लक्षणमनुसृतमिति प्राहुः अतिव्याप्तीतिसंबंधसामान्येन वह्निसामानाधिकरण्या
भाववति गगनादौ धूमसामानाधिकरण्याभावादिति भावः। अननुगतत्वादिति
पर्याप्तत्वपर्यवसायित्वादिति भावः। अत्र केचित् इदमपि लक्षणं केवलान्वयिते
तो वाच्यत्वादिरूपहेत्वधिकरणवृत्तित्वावच्छिन्नाभावाप्रसिद्ध्या। व्याप्यं तादृशे
नवृत्तित्वत्वस्यैवावच्छेदकत्वादिति भेदस्य आप्यवृत्तितापक्षेपि साध्याधिकरणनि
रूपितायाऽवच्छिन्नावृत्तिस्तद्भिन्नवृत्तिकत्वं हेतुसमानाधिकरणान्योन्याभावे निवेश्या
न्योन्याभावघटितलक्षणमेव सम्यगित्याहुस्तत्र। एतन्मते गुरुधर्मस्यावच्छेदकत्वां
गीकारेण दोषादितिदिक्।। इतिश्रीमन्महादेवविरचिते भवानंदीप्रकाशे व्याप्त्यनुग

मप्रकाशस्समाप्तः॥ ॥ ॥पंडितबालमुकुंदकरसिद्धिपुरीमेवास॥ पठ्योग्रंथनैयापि
कादिअस्तूपहोयजात॥ ॥ऐश्वर्यमस्तु॥ रिपुक्षयोस्तु॥ चिरायरस्तु॥ कुशलमस्तु॥